सत्वं रजस्तम इति गुणानां त्रितयं पुरा ।
समाश्रित्य महादेवः शषसऱ्क्रीडति प्रभुः ॥ २५ ॥

शकाराद्राजसं रूपं षकारात्तामसोद्भवः ।
सकारात्सत्वसंभूतिरिति त्रिगुणसंभवः ॥ २६ ॥

तत्त्वातीतः परः साक्षी सर्वानुग्रहविग्रहः ।

अहमात्मा परोहल्स्यादिति शम्भुस्तिरोदधे ॥ २७ ॥

॥ व्याख्या ॥

ततोऽवस्थात्रयं निरूपयति । सत्वमिति ॥ *

हकारः शिववर्णः स्यादिति शैवागमस्थितिरिति शिवम् ॥

Colophon:

इति नन्दिकेशकृतकाशिका संपूर्णा ॥

इति श्रीउपमन्युकृतादिसूत्रनन्दिकेश्वरकाशिकायास्तत्त्वविमर्शिनी

सम्पूर्णा ॥

Subject: Nandikeśakāśikā. with commentary.

Remarks:—The Ms. is in good condition. On the title page is given:—

हे पुस्तक श्रीमन्तराजेश्रीशरभोजिमहाराजसाहेबयांच्या कारकर्दीत

काशीदेशाहून खरीदीकरून आणिलें असें ॥

The work Nandikeśakāśikā by Upamanyu deals with the so-called Māheśvarasūtras. Tradition holds that when Lord Śiva at the end of his dance beat his ḍhakka to rouse up Sanaka and other siddhas the sounds that came out took the form of the so-called Māheśvarasūtras.—अ इ उ ण् etc. This work giving the mystical import of those sūtras is known as Nandikeśakāśikā or Nandikeśakārikā.

॥ पञ्चपदीविवृतिः ॥

5711. PAÑCAPADĪVIVṚTIḤ.

Burnell's Catalogue No. 919. Page 41. Right column.

Substance—Paper. Size—$9\frac{3}{4} \times 8\frac{3}{4}$ inches. Sheets—

20. Lines—7-10 to a Page. Script—Devanāgarī. No. of Granthas—280. Author—Satyavaryārya. Complete. Not printed.

Beginning:

श्रीवेङ्कटेशाय नमः ॥

संनम्य जानकीजानिं गुरून् जयमुनीनपि ।
पंचये पञ्चपद्युक्तं न हि कश्चन वञ्चये ॥ १ ॥

यत्रावहरीदर्शनमित्यस्य साधुत्वप्रतिपादने मन्दजनप्रतारणमात्रं चर्करीता एते तावदसाधव इत्यादि तदयुक्तं तत्र चर्करीता इति तावदसाधु चर्करीतं चेति नपुंसकलिङ्गेन निपातितस्य तथैव निर्देष्टव्यतया पुंलिङ्गबहुवचनान्ततया निर्देशायोगात् ॥

End:

चेकीयमान इत्यत्र इकारपरिकल्पनन्तु नयनदोषादेवेति । अवशिष्टमतिदुष्टमिति स्वमसेवाकरदशामित्यास्तां विस्तरः ॥

Colophon:

निर्णयो यः पञ्चपद्याः सत्यवर्यार्यचर्कृतः ।
तस्यैषा विवृतिर्भूयाच्छुभदा यस्यते सते(?) ॥

इति श्रीसत्यवर्यार्यचर्कृता पञ्चपदीविवृतिः समाप्नोत । इति श्रीविजयतीर्थगुरुराजकरकमलसञ्जातश्रीसत्यप्रियतीर्थगुरुचरणारविन्दाभ्यां नमः । श्रीवासुदेवगुर्वन्तर्गतश्रीवेदव्यासार्पणमस्तु ॥

Subject: Pañcapadīvivṛti.

Remarks:—The Ms. is in a fairly good condition.

॥ परिभाषादिसङ्ग्रहः ॥

5712. PARIBHĀṢĀDISAṄGRAHAḤ.

J. L. Collection No. 823. Substance—Paper. Size—10½ × 3¾ inches. Sheets—2. Lines—24 to a Page. Script—Devanāgarī. No. of Granthas—36. Author—?. Incomplete. Not printed.

Beginning:

नाजानंतर्येबहिष्ट्वप्रक्लृप्तिः ।

End:

जहत्स्वार्था वृत्तिरजहत्स्वार्था वृत्तिः स्त्रीप्रत्यये चानुपसर्जनेन ।

Subject: Paribhāṣādisaṅgraha.

Remarks:—The Ms. is in a fairly good condition.

The paribhāṣās are brought together in this Ms.

॥ परिभाषापाठः ॥

5713. PARIBHĀṢĀPĀṬHAḤ.

J. L. Collection No. 824. Substance—Paper. Size—6 × 3¾ inches. Sheets—8. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—21. Author—?. Incomplete. Printed.

Beginning:

...तदन्तविधिः । एकयोगनिर्दिष्टानां सह वा निवृत्तिः सह वा प्रवृत्तिः ।

End:

सावकाशनिरवकाशयोर्निरवकाशं बलीयः ॥

Colophon:

इति परिभाषा समाप्ता ॥

Subject: Paribhāṣāpāṭha.

Remarks:—The Ms. is in a fairly good condition. After the colophon is given Dhāturūpa beginning with 'लट्वर्तमाने नित्यं स्यात्'

॥ परिभाषाभास्करः ॥

5714. PARIBHĀṢĀBHĀSKARAḤ.

Burnell's Catalogue No. 9984 a. Page 42. Right column. Substance—Palm leaf. Size—19 × 1½ inches. Leaves—91 (1-91). Lines—6 to a Page. Script—Telugu. No. of Granthas—2000. Author—Śeṣādri. Complete. Printed.

Beginning:

नत्वा गुरुचरणयुगं स्मृत्वा ब्रह्माखिलात्मकं विमलम् ।
रचयति शेषाद्रिसुधीः परिभाषाभास्करं स्वशिष्यकृते ॥
व्याख्यानतो विशेषप्रतिपत्तिर्नहि संदेहादलक्षणम् । व्याख्यानतोऽभिमतार्थबोधकाभियुक्तवचनात् विशेषस्याभिमतार्थस्य निर्णयो भवति ।

End:

सर्वत्रेति वा उक्तस्थले स्थानिवत्त्वमिति कैयट इति दिक् ।

Colophon:

इति श्रीशेषाद्रिसुधीविरचितपरिभाषाभास्करः समाप्तः ॥

Subject: Paribhāṣābhāskara.

Remarks:—The Ms. is in good condition. The other work contained herein is some subhāṣita.

The Paribhāṣābhāskara is a running commentary on the various Paribhāṣās. The author Śeṣādrisudhī tells us that he composed the work in order to help his student in understanding them better. The work is available in print having been published from Madras.

॥ परिभाषाभास्करः ॥

5715. PARIBHĀṢĀBHĀSKARAḤ.

Burnell's Catalogue No. 9985. Page 42. Right column.

Substance—Palm leaf. Size—$16\frac{1}{4} \times 1\frac{1}{4}$ inches. Leaves—67. Lines—7 to a Page. Script—Grantha. No. of Granthas—2000. Author—Śeṣādrisudhīḥ. Complete. Printed.

Beginning, end, colophon and subject—Same as No. 5714.

Remarks:—The Ms. is in very good condition.

॥ परिभाषाभास्करः ॥

5716. PARIBHĀṢĀBHĀSKARAḤ.

Burnell's Catalogue No. 889. Page 42. Right column.

Substance—Paper. Size—$11\frac{7}{8} \times 6\frac{1}{2}$ inches. Sheets—71. Lines—11 or 12 to a page. Script—Devanāgarī. No. of Granthas—2000. Author—Śeṣādrisudhīḥ. Complete. Printed.

Beginning, end, colophon and subject—Same as No. 5714.

Remarks—The Ms. is in very good condition. On the title sheet is given:—

हे पुस्तक श्रीमन्तराजेश्रीशरभोजिमहाराजयांच्या कारकतीन्तलिहिलें असें ॥

॥ परिभाषाभास्करः ॥

5717. PARIBHĀṢĀBHĀSKARAḤ.

Burnell's Catalogue No. 890. Page 42. Right column. Substance—Paper. Size—$10\frac{3}{4} \times 4\frac{7}{8}$ inches. Sheets—67. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—1500. Author—Bhāskara. Complete. Not printed.

Beginning:

श्रीगुरुभ्यो नमः ॥

आखण्डलादिसुरमण्डलमण्डनं त-
द्युहण्डकोकविरहानलदण्डचण्डम् ।
ईडेऽहमत्र बहुबोधितमप्रकाण्डं
मार्ताण्डमन्धतमसंप्रति कालदण्डम् ॥

श्रीगुरून्पितरौ नत्वाऽग्निहोत्री भास्कराभिधः ।
भास्करं परिभाषाणां तनुते बालबुद्धये ॥ २ ।

युक्तायुक्ताभिज्ञं वन्द्यं
भूयो भूयो विद्वद्वृन्दम् ।
नामं नामं याचे मन्दो
मान्द्यच्चेदं सो(शो)ध्यं सम्यक् ॥ ३ ॥

मृद्वीमृद्वीकया तुल्या खलैरिव खलैर्यदि ।
नादृतेयं कृतिस्तस्मादस्माकं हानिरस्ति किम् ॥

तत्र तावद्भाष्यकारा वाचीत्यस्मात् परतो भाष्यत इति क्युत्पत्तेः कर्मणि घञुत्पत्तेः तथाप्रतीतेश्च परिभाषापदं यौगिकम् ॥

End :

अत एवानिष्टप्रसक्तौ नैषामभ्युपगम इति 'ज्ञापकसिद्धं न सर्वत्रे'ति परिभाषाया न्यायसिद्धानुवादकत्वमिति न परिभाषावशादनिष्टापादनं साम्प्रतमिति सकलेष्टसिद्धिः ॥

परिभाषाकमलिनीर्युक्तिरुग्भिर्विकासयन् ।
भास्करः पण्डितालीनां स्वान्तं स्वानन्दयत्वयम् ॥ १ ॥

त्र्यम्बकेश्वरपुरीकृतवासादग्निहोत्रकुलनीरधिचन्द्रात् ।
पुण्यपूर्णपुरुषोत्तमभट्टादुद्बभूव सुकृती हरिभट्टः ॥ २ ॥

वेदवाक्यनिचयावचयेन
प्रेक्षितो विधिरिवेह बुधौघैः ।
लोकगीतविमलायतकीर्तिः
सोऽपि सज्जनमणिर्जयतिस्म ॥ ३ ॥

तस्मादुद्भूतकीर्तिः कृतसुकृतभरान्मन्त्रतन्त्रस्वतन्त्रः
साधूनामग्रगण्योगददहनविधौ मानवानां शरण्यः ।
काशीक्षेत्राधिवासी हृतकठिनतरां कृत्तषड्वर्गदम्भः
श्रीमानप्पाजिभट्टः सुरयजनरतः शुद्धधीराविरासीत् ॥

तनय इह तदीयोऽरीरचद्भास्कराख्यः
फणिपतिभणितानामाशयं भावयित्वा ।

परमतपरिभाषाभास्करञ्चार्पितं
सुरवररविपादे सच्चिदानन्दरूपे ॥ ५ ॥
अत्राभ्यासो मनीषा वा सुकृतं वा न किञ्चन ।
मन्ये गुरुकृपाकल्पलतिकैवादिकारणम् ॥ ६ ॥

Colophon:

इति श्रीमत्काश्यपान्वयसम्भवाग्निहोत्रिकुलतिलकायमानहरिभट्टसूनु-श्रीमदायाजिभट्टसूनुभास्करविरचितः परिभाषाभास्करः समाप्तिमगमत् ॥

Subject: Paribhāṣābhāskara

Remarks:—The Ms. is in good condition.

This is another work of the same name by a writer known as Bhāskara, Native of Trayambakapurī. He gives his genealogy as follows:—

Uttamabhaṭṭa
|
Haribhaṭṭa
|
Appājibhaṭṭa
|
Bhāskara.

This Bhāskara belonged to the Agnihotra family and **Kāśyapagotra.**

॥ परिभाषावृत्तिः ॥

5718. PARIBHĀṢĀVṚTTIḤ.

Burnell's Catalogue No. 891. Page 42. Right column.

Substance—Paper. Size—10×4¼ inches. Sheets—114. Lines—9 or 10 to a Page. Script—Devanāgarī. No. of Granthas—2700. Author—Sīradeva. Complete. Printed.

Beginning:

मार्ताण्डस्कन्दविघ्नेशान्मातरं पितरं गुरून् ।
दयालुं दाक्षिणामूर्तिं दातॄन् कल्याणमाश्रये ॥

कामक्रोधादिदूराय कल्याणगुणशीलिने ।
कृष्णानन्दसरस्वत्यै करवै गुरवे नमः ॥

निजपादाम्बुजस्मृत्या नित्यमङ्गलदायिनौ ।
प्रभूतजनयेतारौ [मां] पातां प्रत्यक्षदेवते ॥

स्फुरदभिनवरागा भास्वराभा प्रगल्भा
प्रसभशमितदोषा स्फीतसल्लोकचक्रा ।
विहितहितविचारा जाड्यजातोपशान्त्यै
प्रभवति परिभाषावृत्तिरासेवितैषा ॥

॥ मूलम् ॥

व्याख्यानतो विशेषप्रतिपत्तिर्नहि सन्देहादलक्षणम् । व्याख्यानादाचार्यपारम्पर्योपदेशात्सन्देहेऽपि विशेषभावावगमो भवति ॥ न तु लक्षणाभाव इति ॥

End:

अव्यभिचरितसम्बन्धो यथा । सच्छब्द उत्पत्तिमत्वेऽपि पदार्थे संबन्धं व्यभिचरति तत उक्तवक्तो(?) भावप्रत्ययः सामान्यमभिदधाति न तु क्रियासम्बन्धम् ।

Colophon:

इति श्रीमहोपाध्यायश्रीसीरदेवकृता परिभाषावृत्तिः सम्पूर्णा ॥

अदृष्टदोषोन्नतिविभ्रमाद्वा यदर्थहीनं लिखितं मयात्र ।
तत्सर्वमार्यैः परिशोधनीयं प्रायेण मुह्यन्ति च ये लिखन्ति ॥

Subject: Paribhāṣāvṛtti.

Remarks:—The Ms. is in good condition.

Sīradeva the author of the Paribhāṣāvṛtti, a commentary on Paribhāṣas was a Jain author of about the 12th century A. D.

॥ परिभाषावृत्तिः ॥

5719. PARIBHĀṢĀVṚTTIḤ.

J. L. Collection No. 825. Substance—Paper. Size—10¼×4 inches. Sheets—18. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—590. Author—Sīradeva. Incomplete. Printed.

Beginning:

स्फुरदभिनव Same as No. 5718.

End:

सिद्ध इति ग्रहणमपच्छेद .... ॥

Subject Paribhāṣavṛtti

Remarks:—The Ms. is in good condition.

॥ परिभाषावृत्तिव्याख्या ॥

5720. PARIBHĀṢĀVṚTTIVYĀKHYĀ.

Burnell's Catalogue No. 892. Page 42. Right column. Substance—Paper. Size—14×6 inches. Sheets—22. Lines—18 to a Page. Script—Devanāgarī. No. of Gran-

thas—1800. Author—Rāmabhadradīkṣita. Incomplete. Not printed.

Beginning:

वन्देऽहं वसुधाकन्यावल्लभं वाक्प्रसिद्धये ।
अपि वन्दिष्यमाणो यं वाणीं वाल्मीकिरानशे ॥

करोमि हृदयाम्बुजे कमपि वीरमम्भोनिधेः
निबन्धनमबिन्धनज्वलनबन्धुतूणीशयम् ।
न कश्चिदपि दृश्यते जगति यस्य शक्तो जये
स्मरं प्रहितजानकीनयनपद्मबाणं विना ॥

इदं व्याकरणस्यास्तु त्रिमुनिश्रेयसे नमः ।
प्रयोक्तव्येषु शब्देषु यस्यैवोक्तिः प्रमाण्यते ॥

अप्रत्युपक्रियसमस्तपदप्रबोध-
विश्राणनोपकृतिनिस्तुलितानुकम्पम् ।
शेषद्वितीयमिव शाब्दिकसार्वभौमं
श्रीचोक्कनाथमखिनं गुरुमानतोऽस्मि ॥

राजा स कश्चिदभवद्भुवि यः पुरन्ध्र्या
दीपाम्बया तनुभृता वृतसम्पदेव ।
विद्योतते स्म विधिरीश्वर एव वाचा
शौरिः श्रियेव गिरिशो गिरिकन्ययेव ॥

मुख्योऽसाविति भोसलान्वयभुवां राज्ञामसौ कल्पका-
द्न्योऽभीष्टफलप्रदायक इति प्राप्तेऽप्यसौ संशये ।

शक्तः केवल एव सन्रिपुनृपानुच्छेत्तुमित्युल्लिखे
लोकस्य त्रिविधार्थतां बुधजनो ब्रूते यमेकाभिधम् ॥

तस्मादभूद्दशरथादिव पङ्कजाक्षः
श्रीशाहभूप इति शीलितधर्मविद्यः ।
यो मार्गणव्रजमु…लं विमुच्य
भूमौ व्यपास्तखरदूषणतां दधाति ॥ ७ ॥

लब्धश्रीषु यदीयपाणिकमलालम्बं गतेष्वद्भुतं
खड्गस्यैकतमस्य वृत्तिरभवत्पृथ्वीतले तादृशी ।
भक्त्या यस्य विपक्षपक्ष्मलदृशां पत्रावली गण्डयोः
पातुं वारि न योग्यमस्ति हितयोरप्यश्रुपूरे स्थिते ॥ ८ ॥

सतां तेनार्पिते राज्ञा शाहराजपुराभिधे ।
अग्रहारे स्थितिमता रामभद्रेण यज्वना ॥
पाणिनेः परिभाषाणां वृत्तिर्व्याख्यायतेऽधुना ।
इदं शृण्वन्तु करुणां विधायास्मिन्विपश्चितः ॥

सरसकवितारसज्ञः षड्दर्शन्यर्थतत्त्वविदुदारः ।
भाति त्र्यम्बकयज्वा भाग्यपरीणाम एव सूरीणाम् ॥

एको यस्य विशुद्धयेऽलमुदयः काकोजिविद्वत्प्रभो-
रत्रेरप्यधिकादमर्त्यतटिनीस्नानं तदभ्युच्चयः ।
बाधे सत्यपि तावदौपनिषदे व्यक्त्यै जगत्यां विधि-
प्रामाण्यस्य सहस्रदक्षिणमखानुष्ठानमप्यादृतम् ॥

जातं जयन्तमिव शार्ङ्गभृतासमस्य
यस्याग्रजान्मघवतो नरसिंहरायात् ।

वृद्धश्रवः प्रियगुणं विबुधैरुपेय-

मानन्दरायमखिनं कथयन्ति सन्तः ॥

महाजिक्षितीन्द्रसचिवे तस्मिन्पोषयति रामभद्रमखी ।

लम्भितमनःप्रसादो रचयितुमधुनाहमुत्सहे ग्रन्थान् ॥

व्याचक्षे परिभाषाणां वृत्तिं बालविबुद्धये ।

गुरुपादाम्बुजध्यानज्ञातग्रन्थस्तदाशयः ॥ १५ ॥

अथ सीरदेवः प्रारीप्सितग्रन्थपरिपूरणार्थे मङ्गलाचरणानन्तरकर्तव्यं प्रेक्षावत्प्रवृत्त्यर्थं विषयनिर्देशं सूचयन् ग्रन्थस्य साक्षात्प्रयोजनमाह । स्फुरदिति ।

End:

ननु "इको यणचि" इत्यत्र तदन्तविधौ यणादेशः पदविधिस्थलेऽसमर्थत्वान्न स्यादिति तु शङ्का नोदेतीत्याह । किन्त्वित्यादि । अतो भागवृत्तिकृतोक्तोऽप्यतिप्रसङ्गो दुर्घट इति ज्ञेयम् ॥

Colophon:

इति श्रीयज्ञरामदीक्षितपुत्रस्य रामभद्रदीक्षितस्य कृतौ परिभाषावृत्तिव्याख्यायां प्रथमस्याध्यायस्य प्रथमः पादः

Subject: Paribhāṣāvṛttivyākhyā.

Remarks:—The Ms. is in a fairly good condition.

Rāmabhadra Dīkṣita has commented upon Sīradeva's Paribhāṣāvṛtti and this Ms. represents that work.

॥ परिभाषावृत्तिव्याख्यानम् ॥

5721. PARIBHĀṢĀVṚTTIVYĀKHYĀNAM.

Burnell's Catalogue No. 893. Page 42. Right column. Substance—Paper. Size—12 × 6¼ inches. Sheets—14. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—300. Author—Rāmabhadradīkṣita. Incomplete. Not printed.

Beginning—Same as No. 5720.

End.

वृद्धिसूत्रे भाष्ये न्यायोऽनूदित इत्यर्थः। आरम्भत इति। न्यायबाधनार्थमित्यर्थः। क्वचिदर्थ इति। अव्ययानामनेकार्थत्वात्........ ॥

Subject: Paribhāṣāvṛttivyākhyā.

Remarks :—The Ms. is in good condition.

॥ परिभाषासङ्ग्रहः ॥

5722. PARIBHĀṢĀSAṄGRAHAḤ.

J. L. Collection No. 826. Substance—Paper. Size—10 × 4¾ inches. Sheets—22. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—750. Author—Vaidyanātha. Incomplete. Not printed.

Beginning:

विजेन्यानः सदा शंभुः जगच्छद्रिरिजां मुदा।
यत्पूर्यपाशः पशुना तन्तन्ताद्वाग्गतिं मम ॥

3159

मूर्तिर्यस्य हि पाणिनिः पदमहाभाष्यप्रबन्धा तथा
वाक्यानां कृदपि स्वयं वितनुते वाग्यस्य दास्यं सदा ।
शिष्या यस्य विरोधिवादिमकुटीकुट्टाकवाग्घाटिका-
स्तस्मै मातुलरामभद्रमखिने भूयो नमो मेऽभवत् ॥
प्रणम्य परमं देवं भवानीपतिमव्ययम् ।
क्रियते वैद्यनाथेन परिभाषार्थसङ्ग्रहः ॥

व्याख्यानतो + लक्षणम्

End:

॥ ५१ ॥

तदनुबन्धकग्रहणेनातदनुबन्धकस्य स अनुबन्धो यस्य तस्य ग्रहणे स यत्र नास्ति तस्य ग्रहणं न भवति । यथा च ङीतिद्वित्वमाङि न भवति । 'अदर्शत् । अपुषत्' इति अनुबन्धोच्चारण....... ॥

Subject: Paribhāṣārthasaṅgrahaḥ.

Remarks:—The Ms. is in good condition.

This work is by Vaidyanātha. nephew of the famous Rāmabhadra Dīkṣita. The work deals with the various Paribhāṣās.

॥ परिभाषार्थसङ्ग्रहव्याख्या ॥

5723. PARIBHĀṢĀRTHASAṄGRAHAVYĀKHYĀ.

J. L. Collection No. 827. Substance—Paper. Size—10 × 4½ inches. Sheets—79. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—2000. Author—?. Incomplete. Not printed.

Beginning:

नत्वा गुरुपदद्वन्द्वं संसारजलधिप्लवम् ।

व्याकरोमि यथाबुद्धि परिभाषार्थसङ्ग्रहम् ॥ १ ॥

ग्रन्थादौ विशिष्टमङ्गलमाचरन्ति तस्य च भगवता भाष्यकारेण मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्त इति प्रचयगमनं प्रयोजनमुक्तम् । वीरपुरुषकाण्यायुष्मत्पुरुषकाणि चेति तद्ग्रन्थाभ्यासकर्तॄणां सामर्थ्यातिशयः । आयुर्वृद्धिश्चेति प्रयोजनद्वयमुक्तम् । अतो मङ्गलाचरणस्यावश्यकत्वात् परमेश्वरप्रार्थनरूपं मङ्गलमाचरितं शिष्यशिक्षायै ग्रन्थतो निबध्नाति ॥

विजेज्यान इति ॥

विपूर्वाजिजय इत्यस्माद्धातोः.........

End:

॥ षद्वेति ॥

ननु अकृतव्यूहपरिभाषया येन नाप्राप्ते यो विधिरारभ्यते स वर्णदीर्घप्राप्ति........ ॥

Subject: Paribhāṣārthasaṅgrahavyākhyā.

Remarks:—The Ms. is in a fairly good condition.

This work, a commentary on the Paribhāṣāsaṃgraha of Vaidyanātha, is by an anonymous author.

॥ परिभाषेन्दुशेखरः ॥

5724. PARIBHĀṢENDUŚEKHARAḤ.

Burnell's Catalogue No. 886. Page 42. Right column.

Substance—Paper. Size—12×6 inches. Sheets—56. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—1400. Author—Nāgeśabhaṭṭa. Complete. Printed.

Beginning:

नत्वा साम्बशिवं ब्रह्म नागेशः कुरुते सुधीः ।
बालानां सुखबोधाय परिभाषेन्दुशेखरम् ॥

प्राचीनवैयाकरणतन्त्रे वाचनिकानि । अत्र पाणिनीयतन्त्रे + तानि व्याख्यायन्ते ॥

End:

ष्टिवुक्लम्यिति सूत्रे ष्ठितीति न वक्तव्यम् । भवतीति भाष्ये न केवलं मात्रालाघवं यावदयमप्यर्थमिति कैयटोक्तेः ॥

प्रायेणेति शिवम् ।

Colophon:

इति श्रीनागोजीभट्टकृतः परिभाषेन्दुशेखरः समाप्तः

Subject: Paribhāṣenduśekhara

Remarks:—The Ms. is in good condition On the title page is given –

हे पुस्तक श्रीमन्तराजेश्रीशरभोजिमहाराजसाहेबयाञ्च्याकारकतीम्लिहिले असें

Nāgeśabhaṭṭa's Paribhāṣenduśekhara, dealing with the various Paribhāṣās has been published by Dr. Keilhorn in the Bombay Sanskrit Series.

॥ परिभाषेन्दुशेखरः ॥

5725. PARIBHĀṢENDUŚEKHARAḤ.

Burnell's Catalogue No. 887. Page 42. Right column. Substance—Paper. Size—14×6½ inches. Sheets—53. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—1400. Author—Nāgeśabhaṭṭa. Complete. Printed.

Beginning, end, colophon and subject—Same as No. 5724.

Colophon:

इति श्री + समाप्तः ॥

श्रीमुखे कार्तिके कृष्णे ह्येकादश्यां गुरोर्दिने ।

अलीलिखद्दुण्डुभट्टः परिभाषेन्दुशेखरम् ॥

Remarks.—The Ms is in excellent condition. Alternate sheets are sulphurated.

॥ परिभाषेन्दुशेखरः ॥

5726. PARIBHĀṢENDUŚEKHARAḤ.

J. L. Collection No. 828. Substance—Paper. Size—9½×4¼ inches. Sheets—8. Lines—7-11 to a Page. Script—Devanāgarī. No. of Granthas—170. Author—Nāgeśabhaṭṭa Incomplete. Printed.

Beginning:

ननु यूस्त्र्याख्यावित्यत्र व्यक्तिपक्षे दीर्घनिर्देशात् ।

End:

कैयटोक्तेः प्रायेणेति शिवम् ॥

Colophon:

इति नागोजिभट्टकृतः परिभाषेन्दुशेखरः समाप्तः ।

Subject: Paribhāṣenduśekhara.

Remarks :—The Ms. is in a fairly good condition.

॥ परिभाषेन्दुशेखरः ॥

5727. PARIBHĀṢENDUŚEKHARAḤ.

S. K. Collection No. 51. Substance—Paper. Size—9¾ × 4¼ inches. Sheets—50. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—1120. Author—Nāgeśabhaṭṭa. Incomplete. Printed.

Beginning—Same as No. 5724.

End:

अवयवप्रसिद्धेः समुदायप्रसिद्धिर्बलीयसी। तेन शुद्धरूढस्य जननीवाचकस्यैव ग्रहणम् । न परिच्छेतृवाचकस्य योगज......... ॥

Subject: Paribhāṣenduśekhara.

Remarks :—The Ms. is in a fairly good condition.

॥ परिभाषेन्दुशेखरः ॥

5728. PARIBHĀṢENDUŚEKHARAḤ.

S. K. Collection No. 78. Substance—Paper. Size—10 × 4¾ inches. Sheets—78. Lines—8 or 9 to a Page. Script—Devanāgarī. No. of Granthas—1600. Author—Nāgeśabhaṭṭa. Complete. Printed.

Beginning, end and subject—Same as No. 5724.

Colophon:

इति श्री + समाप्तः ॥

कागलकराशिवभट्टात्मजनारायणभट्टात्मजशेषभट्टसुतबालाख्यस्येदं पुस्तकम्

Remarks:—The Ms. is in a fairly good condition.

॥ परिभाषेन्दुशेखरः ॥

5729. PARIBHĀṢENDUŚEKHARAḤ.

S. K. Collection No. 88. **Substance**—Paper. Size—10×4½ inches. Sheets—2. Lines—12 to a Page. Script—Devanāgarī. No. of Granthas—40. Author—Nāgeśa. Incomplete. Printed.

Beginning—Same as No. 5724.

End:

वाक्यार्थबोधमात्रेणैकवाक्यता

Subject: Paribhāṣenduśekhara.

Remarks:—The Ms is in a fairly good condition.

॥ परिभाषेन्दुशेखरः ॥

5730. PARIBHĀṢENDUŚEKHARAḤ.

J. L. Collection No. 829. **Substance**—Paper. Size—11¾×5 inches. Sheets—60. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—1300. Author—Nāgeśabhaṭṭa. Incomplete. Printed.

Beginning—Same as No. 5724.

End :

अभेदका गुणाः

Subject: Paribhāṣenduśekhara.

Remarks: –The Ms. is in good condition.

॥ परिभाषेन्दुशेखरः ॥

5731. PARIBHĀṢENDUŚEKHARAḤ.

J. L. Collection No. 830. Substance—Paper. Size—10¾×5 inches. Sheets—28. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—780. Author—Nāgeśabhaṭṭa. Incomplete. Printed.

Beginning—Same as No. 5724.

End :

अकृतव्यूहाः पाणिनीयाः * *

बहिरङ्गस्य पूर्वं ज्ञातबहिरङ्गस्य चान्तरङ्गे कर्तव्येऽसिद्धत्वं बोध्यं ॥

Subject : Paribhāṣenduśekhara.

Remarks:—The Ms. is in good condition.

॥ परिभाषेन्दुशेखरः ॥

5732. PARIBHĀṢENDUŚEKHARAḤ.

J. L. Collection No. 831. Substance—Paper. Size—10×4½, inches. Sheets—10. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—250. Author—Nāgeśabhaṭṭa. Incomplete. Printed.

Beginning:

विकरणेभ्यो नियमो बलीयान् । परिभाषां व्याचष्टे शब्दादिविकरणादिति

End:

प्रत्ययग्रहणे यस्मात् स विहितः * अटघा· तोर्लिटसम्बोधने चलटः शतरि सम्बुद्धौनुमिहल्ङ्यादि· लोपे संयोगान्तलोपे च.. ...... ॥

Subject: Paribhāṣenduśekhara.

Remarks:—The Ms. is in a fairly good condition.

॥ पूर्वपक्षसङ्ग्रहः ॥

5733. PŪRVAPAKṢASAṄGRAHAḤ.

S. K. Collection No. 69. Substance—Paper. Size—10 × 4½ inches. Sheets—74. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—1500. Author—?. Incomplete. Not printed.

Beginning:

हलन्त्यम् । हल्प्रत्याहारसिद्धौ हलामित्संज्ञासिद्धिः । इत्संज्ञासिद्धौ च प्रत्याहारसिद्धिरित्यन्योन्याश्रयः आवृत्त्या परिहरणीयः । न च हयवरडित्यादेः आवृत्त्या उपसरित्यन्तं समुदायमुद्दिश्य हलित्यनेन हल्संज्ञापि विधेयेति वाच्यम् । द्व्यसूत्रावृत्तौ गौरवात् ।

End:

स्यादेतत् । टापः प्रागयमधिकारोऽस्तु । ष्फविधौ त-

ङितग्रहणं यस्येति लोपे ईग्ग्रहणं च मास्तु इति चेन्मै-
वम् । पट्वी इत्यत्र ओर्गुणप्रसङ्गात् ।

Colophon:

इति स्त्रीप्रत्ययाः ।

Subject: Purvapakṣasangrahaḥ.

Remarks:—The Ms. is in a fairly good condition.

The author, whose name is not known, takes up some of the sūtras and discusses the necessity of those sūtras and stops with the pūrvapakṣa.

॥ पूर्वपक्षसङ्ग्रहः ॥

5734. PŪRVAPAKṢASAṄGRAHAḤ.

S. K. Collection No. 70. Substance—Paper. Size—12×4½ inches. Sheets—28. Lines—8 or 9 to a Page. Script—Devanāgarī. No. of Granthas—250. Author—? Incomplete. Not printed.

Beginning:

॥ एकविभक्ति ॥

प्रथमानिर्दिष्टमित्यतोऽनुवृत्तं समास इति तदर्थविग्रह-
परमित्याह । विग्रहे इति ॥

नियतेति ॥

एकग्रहणादवधारणगर्भसमासलाभ इति भावः । न-
ष्कोशाम्बिरित्युदाहरणम् ।

End:

॥ श्रयाणां पन्था इति ॥

ऋक्पूरिति समासान्तः । विपथा नगरी । अतिपथे-
त्यादौ च नेदं अर्धनावमितिवच्छोकाश्रयत्वाल्लिङ्गस्य ।
एतेन कापथविपथौ व्याख्यातौ । आवश्यकत्वादनेनैव
सिद्धे रपथं नपुंसकमिति सूत्रं न कार्यम् ॥

Colophon:

इति तत्पुरुषः ।

Subject: Pūrvapakṣasaṅgrahaḥ.

Remarks:—The Ms. is in a fairly good condition.

A work similar to the previous, and deals with Samāsa.

॥ प्रक्रियाकौमुदी ॥

5735. PRAKRIYĀKAUMUDĪ.

Burnell's Catalogue No. 9927. Page 40. Left column.
Substance—Palm leaf. Size—11¼ × 1½ inches. Leaves—166. Lines—9 to a Page. Script—Grantha. No. of Granthas—4200. Author—Rāmacandrācārya. Complete Printed.

Beginning:

अज्ञान + गुरवे नमः ॥

श्रीमद्विट्ठलमानम्य पाणिन्यादिमुनीन् गुरून् ।
प्रक्रियाकौमुदीं कुर्मः पाणिनीयानुसारिणीम् ॥

End:

प्रयोगमनुसृत्य व्याख्यातम् ।

Colophon:

इति वैदिकप्रक्रिया ॥

आनन्त्यात्सर्वशब्दानां न शक्यन्तेऽनुशासितुम् ।

बालव्युत्पत्तयेऽस्माभिः.......................... ।
प्रक्रियाकौमुदी सेयं रामचन्द्र......... ॥

Subject: Prakriyākaumudī.

Remarks:—The Ms. is in a fairly good condition.

The Prakriyākaumudī is a work similar to the Siddhāntakaumudī of Bhaṭṭoji, but written earlier.

The work has been published in the Bombay Sanskrit Series.

॥ प्रक्रियाकौमुदी ॥

5736. PRAKRIYĀKAUMUDĪ.

Burnell's Catalogue No. 9928. Page 40. Left column. Substance—Palm leaf. Size—$16\frac{3}{4} \times 1\frac{1}{4}$ inches. Leaves—142. Lines—8 to a Page. Script—Grantha. No. of Granthas—4200. Author—Rāmacandrācārya. Complete. Printed.

Beginning, end, colophon and subject—Same as No. 5735.

Remarks:—The Ms. is in a fairly good condition.

॥ प्रक्रियाकौमुदी ॥

5737. PRAKRIYĀKAUMUDĪ.

Burnell's Catalogue No. 9930. Page 41. Left column. Substance—Palm leaf. Size—$17\frac{1}{2} \times 1\frac{1}{2}$ inches. Leaves—165. Lines—6 to a Page. Script—Telugu. No. of Granthas—4200. Author—Rāmacandrācārya. Incomplete. Printed.

Beginning, end, colophon and subject—Same as No. 5735.

Remarks: —The Ms. is in a fairly good condition.

Many of the leaves are in a disorderly manner. Several leaves are duplicated.

॥ प्रक्रियाकौमुदी ॥

5738. PRAKRIYĀKAUMUDĪ.

Burnell's Catalogue No. 9931. Page 41. Left column.

Substance—Palm leaf. Size—16 × 1¾ inches. Leaves—63. Lines—11 to a Page. Script—Telugu. No. of Granthas —3000. Author—Rāmacandrācārya. Incomplete.

Beginning—Same as No. 5735.

End

दिङ्मात्रमेतदुक्तम् ।

Colophon:

इति कृदन्तप्रक्रिया ॥

Subject: Prakriyākaumudī.

Remarks:—The Ms is in a fairly good condition.

॥ प्रक्रियाकौमुदी ॥

5739. PRAKRIYĀKAUMUDĪ.

Burnell's Catalogue No. 9938. Page 41. Left column.

Substance—Palm leaf. Size—16¼ × 1½ inches. Leaves—25. Lines—8 to a Page. Script—Telugu. No. of Granthas—800. Author—Rāmacandrācārya. Incomplete. Printed.

Beginning:

यस्सौ । इदमोदस्य । इदमोमः ।

End:

जीवति तु वंश्ये युवा । वंश्ये पित्रादौ जीवति पौत्रादेर्य-
दपत्यं च.................. ।

Subject: Prakriyākaumudī.

Remarks:—The Ms. is in a fairly good condition.

॥ प्रक्रियाकौमुदी ॥

5740. PRAKRIYĀKAUMUDĪ.

Burnell's Catalogue No. 9984. Page 41. Left column. Substance—Palm leaf. Size—16¦ × 1½ inches. Leaves—155. Lines—6 to a Page. Script—Grantha. No. of Granthas—4000. Author—Rāmacandrācārya. Incomplete. Printed.

Beginning:

उगित्वान्नुम् । सान्तमहत इत्युपधादीर्घः । पुमान्
पुमांसौ पुमांसः ।

End, colophon and subject—Same as No. 5735.

Subject: Prākriyākaumudī.

Remarks:—The Ms. is in a fairly good condition.

॥ प्रक्रियाकौमुदी ॥

5741. PRAKRIYĀKAUMUDĪ.

Burnell's Catalogue No. 9935. Page 40. Left column.

Substance—Palm leaf. Size—17×1½ inches. Leaves—172. Lines—6 to a Page. Script—Grantha. No. of Granthas—4000. Author—Rāmacandrācārya. Incomplete. Printed.

Beginning—Same as No. 5735.

End:

बिभेतेर्हेतुभये । बिभेतेरे च आत्वं वा स्यात् ।

Subject: Prakriyākaumudī.

Remarks:—The Ms. is in a fairly good condition.

प्रक्रियाकौमुदी ॥

5742. PRAKRIYĀKAUMUDĪ.

Burnell's Catalogue No. 9987. Page 41. Left column. Substance—Palm leaf. Size—15¾×1¼ inches. Leaves—67. Lines—6 to a Page. Script—Grantha. No. of Granthas—900. Author—Rāmacandrācārya. Incomplete. Printed.

Beginning:

स्तोश्चुनाश्चुः ।

End:

षष्ठ्यादिद्विवचनविशिष्टयोरयं विधिः ।

Subject: Prakriyākaumudī.

Remarks:—The Ms. is in a fairly good condition.

॥ प्रक्रियाकौमुदी ॥

5743. PRAKRIYĀKAUMUDĪ.

Burnell's Catalogue No. 9938. Page 41. Left column.

Substance—Palm leaf. Size—17 × 1 inches. Leaves—64. Lines—6 to a Page. Script—Grantha. No. of Granthas—1500. Author—Rāmacandrācārya. Incomplete. Printed.

Beginning—Same as No. 5735.

End:

पुरस्ताद्ग्रामस्य ।

घनपाद्वितीया ।

Subject: Prakriyākaumudī.

Remarks:—The Ms. is in a fairly good condition.

॥ प्रक्रियाकौमुदी ॥

5744. PRAKRIYĀKAUMUDĪ.

Burnell's Catalogue No. 9939. Page 41. Left column.

Substance—Palm leaf. Size—16 × 1½ inches. Leaves—75. Lines—8 to a Page. Script—Grantha. No. of Granthas— Author—Rāmacandrācārya. Incomplete. Printed.

Beginning:

परेण णकारेण । अम् यम् ङम् ।

End:

इदमोर्हिल् इदमः सप्तम्यन्तात्काले ।

Subject: Prakriyākaumudī.

Remarks:—The Ms. is in decaying condition.

There are 8 damaged leaves at the end, dealing with the same.

॥ प्राक्रयाकामुदी ॥

5745. PRAKRIYĀKAUMUDĪ.

Burnell's Catalogue No. 9940. Page 41. Left column. Substance— Palm leaf. Size—$17\frac{1}{2} \times 1\frac{1}{4}$ inches. Leaves—50. Lines—9 to a Page. Script—Grantha. No. of Granthas—2000 Author—Rāmacandrācārya. Complete. Printed.

Beginning:

प्रकृतिः सा जयत्याद्या यया धात्वादिरूपया ।
व्यज्यते शब्दरूपाणि परप्रत्ययसंनिधेः ॥

धातोः आतृतीयाध्यायान्तं वक्ष्यमाणाः प्रत्ययाः धातोर्ज्ञेयाः ।

End and colophon—Same as No 5735.

Subject: Prakriyākaumudī.

Remarks:—The Ms. is in a fairly good condition.

॥ प्रक्रियाकौमुदी ॥

5746. PRAKRIYĀKAUMUDĪ.

Burnell's Catalogue No. 9942. Page 41. Left column. Substance—Palm leaf. Size—$12\frac{1}{2} \times 1\frac{1}{2}$ inches. Leaves-

13. Lines—9 to Page. Script—Grantha. No. of Granthas—300. Author—Rāmacandrācārya. Incomplete. Printed.

Beginning:

....देशः स्यात् । लभ्यम् । अवश्यलाभ्यम् । तमि-
मित्तयोरिति किम् । ऊयते । औयत ॥

End:

राया राभ्यामित्यादि । ग्लौः ग्लावौ ग्लाव इत्यादि ।

Colophon.

इत्यजन्तपुल्लिङ्गाः ।

Subject: Prakriyākaumudī.

Remarks:—The Ms. is in a fairly good condition.

॥ प्रक्रियाकौमुदी ॥

5747. PRAKRIYĀKAUMUDĪ.

Burnell's Catalogue No. 9948. Page 41. Left column. Substance—Palm leaf. Size—13 × 1½ inches. Leaves—188. Lines—8 to a Page. Script—Grantha. No. of Granthas—3000. Author—Rāmacandrācārya. Incomplete. Printed.

Beginning—Same as No. 5735.

End:

अणोऽपवादः । औपगवयुवाः । अस्त्रियामित्युक्ते गो-
त्रप्रत्यय एव चतुर्थादौ .... ॥

Subject. Prakriyākaumudī.

Remarks:—The Ms. is in a fairly good condition.

॥ प्रक्रियाकौमुदी ॥

5748. PRAKRIYĀKAUMUDĪ.

Burnell's Catalogue No. 9929. Page 41. Left column. Substance—Palm leaf. Size—$18\frac{1}{2} \times 1\frac{1}{2}$ inches. Leaves—125. Lines—9 to a Page. Script—Grantha. No. of Granthas—4200. Author—Rāmacandrācārya. Complete. Printed.

Beginning:

श्रीमद्विठ्ठलमानम्य पाणिन्यादिमुनीन्गुरून् ।
प्रक्रियाकौमुदीं कुर्मः पाणिनीयानुसारिणीम् ॥

अइउण् । ऋऌक् । एओङ् । ऐ औच् । हयवरट् । लण् । ञमङणनम् । झभञ् । घढधष् । जबगडदश् खफछठथचटतव् । कपय् । शषसर् । हल् ॥

इति प्रत्याहारसूत्राणि ॥

हकारादिष्वकार उच्चारणार्थः

हकारो द्विरुपात्तोऽयं अटि शल्यपि वाञ्छया ।
अर्हेणाधुक्षदित्यत्र द्वयं सिद्धं प्रयोजनम् ॥

उपदेशोऽजनुनासिक इत् ॥

End:

"वस हसोर्हलि च" इति उपधालोपः । "झलो झलि" इति सलोपः । सत्वम् । उपधालोपस्य स्थानि·

वत्वाभावात् सस्य जश्त्वम्। समानाग्निः। मग्निरित्यादि
प्रयोगमनुसृत्य व्याख्यातव्यम् ॥

इति वैदिकी प्रक्रिया ॥

आनन्त्यात्सर्वशब्दा(नां) न शक्यन्तेऽनुशासितुम्।
बालव्युत्पत्तयेऽस्माभिः संक्षिप्योक्तं यथामति ॥

प्रक्रियाकौमुदी सेयं रामचन्द्रप्रकाशिता।
असद्वचस्तमोवध्या सच्चकोरप्रिया चिरम् ॥

जयति सुभगमूर्तिर्मुग्धभासावलोक-
प्रशमितजनतापो विठ्ठलस्स्वात्मदीपः।
सचकितमिव लक्ष्मीः सेवते यत्पदाब्जं
ललिततरकराभ्यां साधु संवाहयन्ती ॥

मीमांसायुगलाक्षपादकणभुक्प्रोक्तब्रसद्वाक्यदा
दुर्ज्ञेयाध्वनि शास्त्रतप्तमनसां शब्दादिकेच्छावताम्।
शब्द विचार्य ......साधुवचनध्वान्ताहिनाशक्षमा
तन्याशं(?)गुरुरामचन्द्रजनिना सा प्रक्रियाकौमुदी ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यपूज्यपादशिष्यश्रीरामचन्द्राचार्य-
विरचिता प्रक्रियाकौमुदी समाप्ता ॥

श्रीरामचन्द्राय नमः

ॐ नमः पाणिनिकात्यायनपतञ्जलिभ्यो गुरुभ्यः ॥

Subject: Prakriyākaumudī. From the beginning to Vaidika-Prakriyā.

Remarks.—The Ms. is in a fairly good condition. The last page contains the Aniṭkārika.

॥ प्राक्रियाकौमुदी ॥

5749. PRAKRIYĀKAUMUDĪ.

Burnell's Catalogue No. 9382. Page 41. Left column.

Substance—Palm leaf. Size—14 × 1¼ inches. Leaves—32. Lines—7 to a Page. Script—Telugu. No. of Granthas—850. Author—Rāmacandrācarya. Incomplete. Printed.

Beginning:

येनाक्षर + पाणिनये नमः ।
वाक्यकारं + मुनित्रयम् ।

सोमास्कन्दं शिवं नत्वा पाणिन्यादि मुनीश्वरान् ।
गुरोश्च तुष्टये विष्णोः कलये शब्दकौमुदीम् ॥

श्रीमद्विट्ठलमानम्य पाणिन्यादिमुनीन् गुरून् ।
प्रक्रियाकौमुदीं कुर्मः पाणिनीयानुसारिणीम् ॥

अ इ उ ण् ।

End:

अतियुवाकम् । अत्यावाकम् । अतियुवयि । अत्यावयि । अतियुवासु । अत्यावासु । युष्मानस्मान्वेत्यत्रापि सुजस्ङेउस्सु प्राग्वत् ।

Subject: Prakriyākaumudī. From the beginning to युष्मच्छब्द

Remarks:—The Ms. is in a fairly good condition.

The last few lines deal with some astrological information.

॥ प्रक्रियाकौमुदी ॥

5750. PRAKRIYĀKAUMUDĪ.

J. L. Collection No. 832. Substance—Paper. Size—9½ × 3½ inches. Sheets—97. Lines—7 to a Page. Script—Devanāgarī. No. of Granthas—1700. Author—Rāmacandrācārya. Incomplete. Printed.

Beginning:

श्रीगणेशाय नमः ।

प्रकृतिः सा जयत्याद्या॰ Same as No. 5745.

End:

साध्वसं सारयन्ति ।

Colophon:

इति श्रीरामचन्द्रार्यविरचितायां प्रक्रियाकौमुद्यां कृदन्तं संपूर्णम् ।

Subject: Prakriyākaumudī.

Remarks:—The Ms. is in a fairly good condition. On the last sheet is given

श्रीक्षितवासुदेवबाबाजिस्य इदं पुस्तकम्

॥ प्रक्रियाकौमुदी ॥

5751. PRAKRIYĀKAUMUDĪ.

Burnell's Catalogue No. 11489. Page 185. Right column. Substance—Palm leaf. Size—11¼ × 1¼ inches. Leaves—152. Lines—8 or 9 to a Page. Script—Grantha. No.

of Granthas—2000. Author—Rāmacandra. Incomplete. Printed.

Beginning:

श्रीमद्विठ्ठलः Same as No. 5748.

End:

गोपीभावमकाम्यत भावः ...श्रैनामतं तेन...... ।

Colophon:

इति भावकर्मप्रक्रिया ।

Subject: Prakriyākaumudī.

Remarks:—The Ms. is in a fairly good condition.

The other works contained herein are:—

i. Viśveśvarapaṇḍita's Vākyavṛtti Prakāśikā.

ii. Gītāmāhātmya from the Skāndapurāṇa.

This work has not been noticed by Dr. Burnell under this No.

॥ प्रक्रियाकौमुदीव्याख्या ॥

5752. PRAKRIYĀKAUMUDĪVYĀKHYĀ.

Burnell's Catalogue No. 908. Page 41. Left column. **Substance**—Paper. Size—10¾×4¾ inches. Sheets—259. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—4300. Author—Viśvakarmavidvān. Complete. Not printed.

Beginning:

श्री वेदव्यासाय नमः ॥

शारदां शारदां नत्वा लब्ध्वा च तदनुग्रहम् ।
तिङन्तमतिविस्तार्थं संक्षिप्य व्याकरोम्यहम् ॥

सुबन्तं व्युत्पाद्यावसरसङ्गत्या तिङन्तं व्युत्पादयितुमिच्छन्मध्ये मङ्गलमाचरति । प्रकृतिरिति । सा वैयाकरणप्रसिद्धा । आद्या प्रत्ययापेक्षया पूर्वावधिभूता प्रकृतिः । प्रत्ययमवधिं कृत्वा यः शब्दः पूर्वमुपादीयते सा प्रकृतिः ।

End:

तृतीयादि पुंवदिति । आमभावपक्षे तृतीयादिषु पुंवद्भाव इत्यर्थः । अन्योन्येनेमाः कारयन्ति । एवमन्योन्यस्मै प्रयच्छन्तीत्यादि । आम्पक्षे तु अन्योन्यां कारयन्तीत्यादिसंक्षेपः ।

Colophon:

श्रीदामोदरविप्रमण्डनमणिः यो भीमसेनात्मजः
सारासारविविक्तसमस्तगुणयुक्साधुः सतां संमतः ।
तत्पुत्रस्य व विश्वकर्मविदुषः सत्प्रक्रियाव्याकृतौ
ह मं कृतौ समाप्तिगमत्सर्वं सुबन्तं शुभम् ॥

रसिकान्पण्डितान्साधून् सोमसारविवेचकान् ।
विशति श्री(नि)गूढार्थो प्रमोदयतु मे कृतिः ॥

Subject: Prakriyākaumudīvyākhyā otherwise known as prakriyā pradīpa.

Remarks:—The Ms. is in a fairly good condition.

This commentary is known as prakriyāpradīpa and was composed by one Viśvakarmavidvān, about whom more is not known at present, except that he is the son of one Dāmodara.

॥ प्रक्रियाकौमुदीव्याख्या ॥

5753. PRAKRIYĀKAUMUDĪVYĀKHYĀ.

Burnell's Catalogue No. 909. Page 41. Left column. Substance—Paper. Size—$10\frac{3}{4} \times 4\frac{3}{4}$ inches. Sheets—200. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—3670. Author—Viśvakarmavidvān. Complete. Not printed.

Beginning:

यः सेवितो हरिविरिञ्चिहरप्रमुख्यैः
सिद्धादिभिर्मुनिगणैर्मनुजैश्च सर्वैः ।
नित्यं ददात्यभिमतं फलमादिदेवो
गौरीसुतो गणपतिः स करोतु सिद्धिम् ॥

सरस्वतीं नमस्कृत्य गुरुं दामोदरं तथा ।
करोमि विशदं वर्त्म प्रक्रियाघनकानने ॥

मत्सरत्वं समुत्सार्य विचार्य च परिश्रमम् ।
तत्र तत्र करिष्यामि जिज्ञासोरुपकारकम् ॥

तत्रादौ प्रक्रियाकौमुदीं चिकीर्षवो रामचन्द्राचार्याः तत्समाप्त्यर्थमिष्टदेवतागुरुप्रणामरूपं कृतं मङ्गलाचरणं शिष्यशिक्षार्थं निबध्नन्तो विषयप्रयोजनरूपसम्बन्धाधिकारिरूपानुबन्धचतुष्टयं प्रवृत्त्यौपयिकं सूचयन्तश्च प्रतिजानते श्रीमद्विठ्ठलमित्यादि । अत्र मङ्गले गौतमीयानां मतद्वयम् । तथाहि । विघ्नध्वंसः फलम् । प्रारब्धनिर्वाहो विघ्नो मा वर्ततामिति शिष्टानुष्ठानात् ।

End:

यच्चरणकमलं लक्ष्मीः ललिततरकराभ्यामतिमनोहर-
हस्ताभ्यां साधु सचकितं सभयञ्च यथा स्यात्तथा संवा-
हयन्ती सेवते ॥

Colophon:

श्रीदामोदरविज्ञमण्डनमणिः यो भीमसेनात्मजः
सारासारविविक्तसमस्तगुणयुक्साधुस्सतां संमतः ।
तत्पुत्रस्य च विश्वकर्मविदुषः सत्प्रक्रियाख्या कृतौ
संक्षेपेण कृतौ समाप्तिमगमद्वेदाश्रया प्रक्रिया ॥

प्रक्रियाप्रदीपोऽयं रचितः श्रीविश्वकर्मणा विदुषा ।
चिरकालमसौ जीयादमृतोपज्ञो जिज्ञासूनाम ॥

Subject: Prakriyākaumudī Vyākhyā otherwise known as Prakriyāpradīpa.

Remarks:—The Ms. is in good condition.

॥ प्रक्रियाकौमुदीव्याख्या ॥

5754. PRAKRIYĀKAUMUDĪVYĀKHYĀ.

Burnell's Catalogue No. 910. Page 41. Left column. Substance—Paper. Size—$13\frac{1}{4} \times 4\frac{1}{2}$ inches. Sheets—190. Lines—6 to 10 to a Page. Script—Devanāgarī. No. of Granthas—4300. Author—Kṛṣṇapaṇḍita. Incomplete. Not printed.

Beginning:

सिद्धे शब्दार्थसम्बन्ध इति वार्तिककारेणार्थे प्रयुक्तानां

शब्दानामिदमनुशासनमित्युक्तम् । प्रयोगश्च... पदं न प्रयुञ्जीतेति निषेधात् । पदञ्च द्विविधम् । सुप्तिङन्तं पदमिति वचनात् ।

End:

जाने इति दितोनिर्देशात् जनजन(?)इत्यस्याग्रहणम् । न चैतस्य वृद्धिप्रसङ्ग आपादनीयः, छान्दसत्वात् । छन्दसि दृष्टानुविधानात् । एवञ्चोभयोरपि ग्रहणमिति प्राचोक्तम् । निर्शुक............ ॥

Colophon: (Sheet No. 109)

पृथ्वीमण्डलमौलिमण्डनमणिश्रीशेषवंशामलो-

त्तंसश्रीनरसिंहसूरिरभवत्प्रत्यक्षवाचस्पतिः ।

तत्सूनोः कृतगूढभावविवृतौ सत्प्रक्रियाव्याकृतौ

श्रीकृष्णस्य कृतौ समाप्तिमगमान्निष्टाभिधा प्रक्रिया ॥

Subject: Prakriyākaumudīvyākhyā otherwise known as Gūḍhabhāvavivṛti.

This commentary is by Kṛṣṇapaṇḍita. Who this author is, is not known at present.

॥ प्रक्रियाकौमुदीव्याख्या ॥

5755. PRAKRIYĀKAUMUDĪVYĀKHYĀ.

Burnell's Catalogue No. 9947. Page 41. Left column. Substance—Palm leaf. Size—$16 \times 1\frac{1}{2}$ inches. Leaves—116. Lines—6 to a page. Script—Grantha. No. of Granthas—2000. Author—Vāraṇavaneśaśāstrin. Incomplete. Not printed.

Beginning:

यद्विभूषणसंरावस्त्वत्राहृपरिरक्षकः ।

स देवदेवो मामव्याद्यक्षेत्राणि तमोनुदः(?) ॥

मङ्गलादीनि मङ्गलमध्यानि (मङ्गलान्तानि च) शास्त्राणि प्रथन्त इत्यभिप्रायेण ग्रन्थकारो मध्येऽपि मङ्गलाचरणं करोति । प्रकृतिरिति ॥ यस्मात्परः प्रत्ययो विधीयते सा-प्रकृतिः । धात्वादिरूपया धातवो भ्वादयश्चादिर्येषान्तानि धात्वादीनि ॥

End:

समानस्य सच्छब्दस्य मूर्धप्रभृत्युदर्केष्विति समानस्य सभाव नमः अपशब्दान्धकारं वध्यादि-त्यहार्थे कोरप्रियास्सन्तो विद्वांसः त एव चकोरास्तेकद्विबहुसंज्ञे

Colophon:

इति वारणवनेशशास्त्रिविरचितायां प्रक्रियाकौमुदीव्याख्यायाममृत-स्रुतौ वैदिकप्रक्रिया । शुभमस्तु । श्रीगुरुभ्यो नमः ।

Subject: Prakriyākaumudīvyākhyā otherwise known as Amṛtasruti.

Remarks: —The Ms. is in good condition.

The author of this comemtary is known **Vāraṇavaneśa Śāstrin** about whom nothing is known.

॥ प्रबोधचन्द्रिका ॥

5756. PRABODHACANDRIKĀ.

Burnell's Catalogue No. 5176. Page 169. Right column.

Substance—Paper. Size—$12 \times 4\frac{1}{8}$ inches. Sheets—24. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—430. Author—Vaijalabhūpati. Complete. Not printed.

Beginning:

हरिहरगुरुभक्तः सर्वलोकानुरक्तः
त्रिभुवनगतकीर्तिः ज्ञान्तिकन्दर्पमूर्तिः ।
रणरिपुगणकालो वैजलक्षोणिपालो
जगति जयति (ध)दाता सर्वकर्मात्रदाता ॥

चन्द्रावती वदनचन्द्रचकोरविक्र-
मादित्यभूपतनयो नयतन्त्रवेत्ता ।
चौहानवंशतिलकः पन्ना(?)धिनाथ
राजा परं जयति वैजलदेवनामा ॥

...ाभिधा ...
...otherwise

रामो मेऽभिहितं करोतु सततं रामं भजे सादरं
रामेणापहृतं समस्तदुरितं रामाय दत्तं धनुः ।
रामान्मुक्तिरभीप्सिता सरभसं रामस्य दासोस्म्यहं
रामे रज्जतु मे मनः करुणया भो राम मां पालय ॥

  

विना व्याकरणं वाणी रमणी रमणं विना ।
विवेकश्च विना लक्ष्मीः न सुखाय कदाचन ॥ ३१ ॥

तस्माद्व्याकरणं पूर्वं पठध्वं बुद्धिवृद्धये ।
पश्चान्नीतिं पठित्वा त्वं राज्यं भज यथासुखम् ॥

* * *

प्रबोधचन्द्रिका नाम रामचन्द्रसमाश्रिता ।
अज्ञानतिमिरध्वंसकारिणी चित्तहारिणी ॥ ३५ ॥

बहवः प्रक्रियाग्रन्थाः सन्ति चेत्सन्तु का क्षतिः ।
मालतीमधुरः (?) क्वापि मधुपानां लतान्तरे ॥

विभक्तिज्ञानतो यस्मात्प्रबोधः प्रतिपद्यते ।
तस्मादिह प्रथमतो विभक्तिः प्रतिपाद्यते ॥ ३७ ॥

श्रीगणेशाय नमः ॥

रामो मे + पालय ॥

स्वादिस्त्यादिर्विभक्ती द्वे स्वादौ सप्तविभक्तयः ।
एकद्विबहुसंज्ञानि वचनानि च सप्तसु ॥

End:

असौ रामोऽप्यनेकश्च सक एषक एव हि ।
ग्रन्थस्य गौरवभयान्मया नोक्तं सविस्तरम् ॥

Colophon:

प्रबोधचन्द्रिकायाञ्च कृतौ वैजलभूपतेः ।
एषा विशेषतः सुष्ठु समाप्ता सन्धिचन्द्रिका ॥ ४३७ ॥

शमीगर्भस्य यो गर्भस्तस्य गर्भस्य यो रिपुः ।
रिपुगर्भस्य यो गर्भः स मे विष्णुः प्रसीदतु ॥

Subject: Prabodhacandrikā.

			Sheets
I	स्वादिविभक्तिचन्द्रिका		I—6
II	त्यादि	,, ,,	6—8
III	कारक	,,	8—11
IV	अनुक्त	,,	11—14
V	समास	,,	14—16
VI	तद्धित	,,	16—18
VII	कृदन्ताख्य	,,	18—20
VIII	सन्धि	,,	20—24

Remarks:—The Ms. is in good condition. On the title page is given:—

हे पुस्तक श्रीमन्तराजेश्रीशरभोजी आणिलें असें

On the first page is given Seven fragmentary verses dealing with Astrology.

Prabodhacandrikā is by one Vaijalabhūpati of the family of Cauhan. The work deals with [illegible] like [illegible]bhakti, Kāraka. Samāsa etc. and the illustration [illegible]ereof serve as praises of Śrī Rāma. Who this Vaijalabhūpati is we cannot say at present.

॥ प्रयोगविवेकसङ्ग्रहः

5757. PRAYOGAVIVEKASANGRAHAH.

Burnell's Catalogue No. 5044. Page 42. Right column.

Substance—Paper. Size—$12\frac{1}{2} \times 4\frac{1}{8}$ inches. Sheets—20. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—600. Author—Vararuci. Complete. Not printed.

Beginning:

प्रयोगमिच्छता ज्ञातुं ज्ञेयं कारणमादितः ।
संज्ञायाः षड्विधं भेदास्त्रयोविंशतिधा पुनः

॥ प्रयोगमिच्छतेति ॥

यो यथा विहितं शब्दप्रयोगं ज्ञातुमिच्छति तेनादितः कारकं ज्ञेयमिति । प्रयुक्त इति प्रयोगः । अकर्तरि च कारके संज्ञायामिति घञ् । तच्च कारकं संज्ञया षड्विधम् ।

End:

उत्तरपदस्थितेन कृत्प्रत्ययेन समासो न भवति । कथमवगम्यते कटं कुर्वन्नोदनं पचमानः । ग्रन्थनाशभयेनेति कोऽर्थः । प्रयोगलाभचातुर्ययशोऽभिलाषिणां कारुण्यविलसितचेतसा प्रवृत्तिरिति तत्र दर्शनार्थमित्यर्थः

Colophon:

इति वररुचिकृते प्रयोगविवेकसङ्ग्रहे तृतीयपटलः भोसलकुलभूपच्छायावासिना उटगीत्युपनाम्ना लिखितम्

Subject: Prayogavivekasaṅgraha.

Remarks:—The Ms. is in a fairly good condition.

Vararuci, the author of Prayogavivekasaṅgraha need not be confused with his great namesake, the author of the Vārtikas on Pāṇini's sūtras.

॥ प्रयोगमुखम् ॥

5758. PRAYOGAMUKHAM.

J. L. Collection No. 883. **Substance**—Paper. **Size**—18 × 6¼

Sheets— 11. Lines—15 to a Page. Script—Devanāgarī. No. of Granthas —400 Author—Vararuci. Compiete. Not printed.

Beginning:

श्रीगणेशाय नमः

प्रयोगमिच्छतेति यो यथा विहितं शब्दप्रयोगं ज्ञातुमिच्छति तेन आदितः कारकं ज्ञेयमिति । प्रयुज्यत इति प्रयोगः । अकर्तरि च कारके संज्ञायामिति घञ् । चजोरिति घत्वम्

End:

श्लोकानां पञ्चत्रिंशतेर्ग्रथनादहं परार्थभारमाशयेन हृदयेनोद्वोढुं भवे भवे जन्मनि जन्मानि प्रभवेयमित्यन्वयः ।

Colophon:

इति श्रीमन्महापण्डितमण्डलीविराजमानव्याकरणपरमाचार्यश्रीवररुचिमहाशयेन श्रीदुर्बुद्धिबालकानां बोधनार्थं विरचिते प्रयोगमुखे कृदन्तपटल. समाप्तः ।

भग्नपृष्ठ + पाल्यताम् ।

Subject: Prayogamukha.

Remarks:—The Ms. is in good condition.

The prayogamukha is the same work as prayogavivekasangraha, though the name slightly varies.

॥ बालबोधिनी ॥

5759. BĀLABODHINĪ.

Burnel's Catalogue No. 5047. Page 41. Right column.

Substance—Paper. Size—10½ × 5⅛ inches. Sheets—6. Lines—8-10 to a Page. Script—Devanāgarī. No. of Granthas—100. Author—Bālasūri. Complete. Prakaraṇa I. Not printed.

Beginning:

नत्वा श्रीशेषभट्टाख्यं पितरं बालसूरिणा ।
लीलया बालबोधाय तन्यते बालबोधिनी ॥

आदौ महाराष्ट्रभाषया विभक्त्यर्था उच्यन्ते । तो ते तं प्रथमा ॥ १ ॥

अगाये अवोगे संबोधनप्रथमा । त्याते त्याप्रति द्वितीया । तेणे तेणे करूण तेणेशीं तृतीया ॥ ३ ॥ * *

अकारान्तः पुंलिङ्गो रामशब्दः । रामः रामौ रामाः ।

End:

तत्रादावाकांक्षाक्रमः ॥

रामो जनान् धनैः कीर्त्यै दारिद्र्यान्नगरे पितुः ।
रक्षत्यालोच्य शास्त्रार्थं धर्मज्ञो राजसत्तमः ॥ १ ॥

रक्षति कः रामः । कथंभूतः राजसत्तमः । पुनः कथंभूतः धर्मज्ञः । * कं शास्त्रार्थम् । अथान्वयः । धर्मज्ञः राजसत्तमः * रक्षति । अन्वये सर्वत्र कारकाणां क्रमविवक्षा नास्ति । प्रत्येकं स्वातन्त्र्येण क्रियान्वयात् ॥

Colophon:

इति बालबोधिन्यां संक्षेपेण विभक्त्यर्थाकांक्षान्वयकथनं नाम प्रथमं प्रकरणम् ।

Subject: Bālabodhinī; 1st Prakaraṇa.

541

Remarks:—The Ms. is in good condition.

The Bālabodhinī of Bālasūri consists of seven distinct parts. The following are the various divisions:—

1 विभक्त्यर्थाकाङ्क्षान्वयप्रकरणं ।

2 शब्दप्रकरणं ।

3 अन्वयप्रकरणं ।

4 विभक्त्यर्थप्रकरणं ।

5 धातुप्रकरणं ।

6 समासादिपञ्चवृत्तिप्रकरणं ।

7 सन्धिप्रकरणं ।

The author, Bālasūri, was a contemporary of Serfojee II, son of Tulajā, who reigned between 1765—1787 at Tanjore. Serfojee himself reigned between 1800 & 1832 A. D. and hence the author should have flourished in the beginning of the 19th century.

॥ बालबोधिनी ॥

5760. BĀLABODHINĪ.

Burnell's Catalogue No. 50. Page 41. Right column. Substance—Paper. Size—$10\frac{1}{4} \times 4\frac{3}{4}$ inches. Sheets—42. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—600. Author—Bālasūri. Complete. Prakaraṇa II. Not printed.

Beginning:

अथ द्वितीयं शब्दप्रकरणम् ।

रामान्यतमकृष्णाश्च तुल्यवाची समस्तथा ।
अन्तरश्चेलबाह्याभवाची चैते समाः स्मृताः ॥ १ ॥

सर्वश्च विश्वः कतरः कतमान्यतरान्यकाः ।
इतरस्त्वसमश्चापि सिमस्तुल्या दशेरिताः ॥ २ ॥

End:

अदः अमू अमूनि ॥ शेषं पुंवत् । इति सकारान्तो न-
पुंसकलिङ्गो ।

Colophon:

इति बालबोधिन्यां हलन्ता नपुंसकलिङ्गाः ।
इत्यशीत्युत्तरशतं शब्दा भिन्नाः परस्परम् ।
उक्ता हि बालबोधिन्यां बालाख्येन विपश्चिता ॥
इति बालबोधिन्यां द्वितियप्रकरणं समाप्तम् ।

Subject: Bālabodhini; Second prakaraṇa.

Remarks:—The Ms. is in a fairly good condition.

॥ बालबोधिनी ॥

5761. BĀLABODHINĪ.

Burnell's Catalogue No. 5049. Page 41. Right column. Substance—Paper. Size—$10\frac{1}{8} \times 4\frac{3}{4}$ inches. Sheets—3. Lines—8 to a page. Script—Devanāgarī. No. of Granthas—30. Author—Bālasūri. Complete. Prakaraṇa III Not printed.

Beginning:

श्रीगुरुभ्यो नमः ॥

अथाव्ययप्रकरणम् । आङ् आ कुः चिद् । च स्वस्ति ।

End:

प्र परा * परि उप २२ एते प्रादयः ।

"सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु ।

वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ॥"

Colophon:

इति बालबोधिन्यामव्ययप्रकरणं नाम तृतीयं समाप्तम् ॥

Subject: Bālabodhinī. Third prakaraṇa only.

Remarks:—The Ms. is in a fairly good condition.

॥ बालबोधिनी ॥

5762. BĀLABODHINĪ.

Burnell's Catalogue No. 5050. Page 41. Right column. Substance—Paper. Size—$10\frac{1}{8} \times 4\frac{3}{4}$ inches. Sheets—9. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—120. Author—Bālasūri. Complete. Prakaraṇa IV. Not printed.

Beginning:

अथ विभक्त्यर्थप्रकरणम् ।

विभक्त्यर्थप्रबोधेन पण्डितो जायते जनः ।

तस्मात्ते प्रतिपाद्यन्ते विभक्त्यर्था इहाधुना ॥

विभक्तिर्द्विधा । सुब्विभक्तिस्तिङ्विभक्तिश्चेति ।

End:

मयि खादति रामोऽयमन्मथ्यमचामत्युपागतः ।

एवं लिङ्गेषु सर्वेषु विभक्तिवचनेषु च ॥ ५१ ॥

उक्तानुसारि विज्ञेयमुदाहरणमुत्तमम् ।
समाप्ता बालबोधिन्यां विभक्त्यर्था यथाक्रमम् ॥

Colophon:

इति बालबोधिन्यां विभक्त्यर्थप्रकरणं नाम चतुर्थं समाप्तम् ।

Subject: **Bālabodhinī.** 4th Prakaraṇa.

Remarks:—The Ms. is in good condition.

॥ बालबोधिनी ॥

5763. BĀLABODHINĪ.

Burnell's Catalogue No. 5051. Page 41. Right **column.** Substance—Paper. Size—$11\frac{7}{8}\times6\frac{1}{4}$ inches. Sheets—11. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—200. Author—Bālasūrī. Incomplete. **Prakaraṇa V.** Wants end. Not printed.

Beginning:

अथ धातुप्रकरणम् ।

तत्रादौ दशलकारा प्रदर्श्यन्ते । लट् ❀ लङ् १०
"लट् वर्तमाने लेट् वेदे भूते लुङ्लङ्लिटस्तथा ।
विध्याशिषोश्च लिङ्लोटौ लुङ् लट् लृङ् च भविष्यति ॥"
अथ कर्तरि लकारा उच्यन्ते ।

End:

लुट् ॥ कर्ता कर्तारौ कर्तारः ।

Colophon:

इति बालबोधिन्यां दशविकरिण्यामात्मनेपदिनः ।

Subject: Bālabodhinī; 5th prakaraṇa.

Remarks:—The Ms. is in a fairly good condition. This Ms. abruptly ends in the middle of the 5th Prakaraṇa.

॥ बालबोधिनी ॥

5764. BĀLABODHINĪ.

Burnell's Catalogue No. 5052. Page 41. Right column.
Substance—Paper. Size—$10\frac{1}{8} \times 4\frac{1}{2}$ inches. Sheets—12. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—150. Author—Bālasūrī. Complete. Prakaraṇa VI. Not printed.

Beginning:

अथ समासादिपञ्चवृत्तिप्रकरणम् ।

समासैकशेषतद्धितकृत्सनाद्यन्तधातुरूपाः पञ्चवृत्तयः ।

परार्थाभिधानं वृत्तिः

End:

तत्प्रकृतवचन इत्यर्थको यथा ।

प्राचुर्येण प्रस्तुत सन्नमन्नमयम् (?) ।

Colophon:

इति तद्धितवृत्तिः समाप्ता ॥

इति चतुर्थे विभक्त्यर्थप्रकरणे कृद्वृत्तिरुक्ता ॥ ४ ॥

पञ्चमे धातुप्रकरणे सनाद्यन्तधातुरूपवृत्तिरुक्ता ॥ ५ ॥

इति बालबोधिन्यां समासादिपञ्चवृत्तिप्रकरणं समाप्तम् ।

Subject: Bālabodhinī. 6th Prakaraṇa.

Remarks:—The Ms. is in a fairly good condition.

॥ बालबोधिनी ॥

5765. BĀLABODHINĪ.

Burnell's Catalogue No. 5053. Page 41. Right column. Substance—Paper. Size—$10\frac{1}{8} \times 4\frac{1}{2}$ inches. Sheets—7. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—75. Author—Bālasūrī. Complete. Prakaraṇa VII. Not Printed.

Beginning:

अथ सन्धिप्रकरणम् ।

तत्तत्सूत्रात्समुद्धृत्य किञ्चित्पाणिनिसंमतम् ।
काव्यश्लोकपदच्छेदेऽप्युपयुक्तमिहोच्यते ॥

End:

'एतत्तदोश्च सोरुः स्यात्तस्य लोपो हलि स्मृतः ।'
स्पष्टोऽर्थः ।

एषस् विष्णुः एष विष्णुः । स शम्भुः । इति स्वादि-
सन्धिः

Colophon:

इति सप्तमं सन्धिप्रकरणम् समाप्तं ।

प्रतापसिंहक्षितिपालतेजसा
पराभवद्भिरपि स्वयं सदा ।
न शोभते किन्तु निलीय नक्तं
गृहे गृहे कम्पत एव सर्वदा ॥

प्रतापसिंहक्षितिपालसूनो-
र्महीभुजः श्रीतुलजाह्वयस्य

तेजोविशेषं परिगृह्य पूर्णं
विधुं विधिः पर्वणि साधु चक्रे ॥ २ ॥

श्रीमत्तुलजभूपालसूनोः शरभभूपतेः ।
तेज एष नभोमार्गे सूर्यनाम्ना विराजते ॥ ३ ॥

शरभक्ष्मापतेः कीर्तिं श्रुत्वा मौलिः प्रकम्प्यते ।
भुवः पातभयाच्छेषोऽकर्ण एव ततः कृतः ॥

इन्द्रौ सृष्ट्वातु विधिना तुलामारोपितौ तयोः ।
शरभेन्द्रो महीं यातो लघुतः स्वर्गतोऽपरः ॥

श्रीमद्भोसलवंशवारिधिसमुद्भूतः कलावान्महा-
शत्रुध्वान्तविभेदको द्विजगणान् स्वीयैः करैः प्रीणयन् ।
श्रीमच्चोलमहीं सुशास्ति शरभक्ष्मावल्लभः शाश्वतो
यस्याज्ञावशगः करोति विपुलं वीर्ये रणेचेद्रतिः(?) ।

तादृक्छरभभूपालाल्लब्ध्वा जीवनमुत्तमम् ।
बालशास्त्रिसमाख्येन सतां सन्तुष्टये खलु ॥

भूता५श्व७भू१धरा१सङ्ख्यग्रन्था विरचिता शुभा ।
वैयाकरणसिद्धान्तबोधिनी बालबोधिनी ॥

इति कागलकरोपनामकश्रीनारायणभट्टात्मजशेषभट्टसूनुबालसूरिविरचिता बालबोधिनी समाप्ता ॥

ग्रन्थसङ्ख्या ११७५ ।

Subject: Bālabodhinī; 7th prakaraṇa.

Remarks:—The Ms. is in good condition.

Descriptive No.	Collection No.	Substance	Size inches.	No. of Sheets or leaves.	No. of Lines Per Page or Sheet.	Script	Complete or otherwise.
5766	J. L. 833	Paper.	$10\frac{1}{2}\times4\frac{1}{2}$	4	12	Devanāgarī.	Prakaraṇa I Complete.
5767	,, 834	,,	10×5	11	9	,,	,, ,, ,,
5768	,, 835	,,	$7\frac{1}{2}\times3\frac{1}{2}$	12	7	,,	,, ,, ,,
5769	T. S. 1050	,,	$7\frac{1}{2}\times5\frac{1}{2}$	18	10	,,	,, ,, ,,
5770	S. K. 298	,,	$11\times3\frac{1}{2}$	9	7	,,	,, ,, ,,
5771	B. L. 5054	,,	$8\frac{1}{2}\times4\frac{1}{2}$	6	8	,,	Prakaraṇa II Incomplete.
5772	,, 5060 & 5055	,,	$10\frac{7}{8}\times4\frac{1}{4}$	26	8 or 9	,,	,, ,, ,,
5773	,, 5059	,,	$8\frac{7}{8}\times4\frac{1}{4}$	27	9	,,	,, ,, ,,
5774	J. L. 836	,,	10×4	45	8	,,	,, ,, Complete.
5775	,, 837	,,	$1\frac{1}{2}\times3\frac{1}{2}$	12	5	,,	,, ,, Incomplete.
5776	,, 838	,,	$8\frac{1}{4}\times4$	35	7	,,	,, ,, ,,
5777	T. S. 1054	,,	$9\frac{3}{4}\times4\frac{1}{2}$	22	10	,,	,, ,, Complete.
5778	S. K. 283	,,	$9\frac{1}{2}\times3\frac{1}{2}$	20	8	,,	,, ,, ,,
5779	,, 299	,,	$9\frac{1}{2}\times4\frac{1}{2}$	8	6	,,	,, ,, ,,
5780	,, 299 a	,,	$9\frac{1}{2}\times4\frac{1}{2}$	30	6	,,	,, ,, Incomplete.

Descriptive No.	Collection No.	Substance	Size inches.	No. of Sheets or leaves.	No. of Lines per Page or sheet.	Script	Complete or otherwise.
5781	B. L. 5056	Paper.	12×6	3	10	Devanāgarī.	Prakaraṇa III Complete.
5782	S. S. 57 a	,,	11⅛×3¼	2	16	,,	,, ,, ,,
5783	T. S. 1052	,,	10¼×4¼	11	7	,,	,, III & IV ,,
5784	B. L. 5057	,,	11⅞×8	7	10	,,	,, IV ,,
5785	J. L. 839	,,	9×3¾	16	6	,,	,, ,, Incomplete.
5786	,, 840	,,	9¾×4	6	8	,,	,, ,, ,,
5787	S. K. 304	,,	11×3¼	4	7	,,	,, ,, ,,
5788	J. L. 841	,,	8¼×4	28	6	,,	,, V Complete.
5789	,, 842	,,	10×3½	21	4	,,	,, ,, Incomplete.
5790	,, 843	,,	7¾×4	15	12	,,	,, ,, Complete.
5791	,, 844	,,	10×4¼	29	6	,,	,, ,, ,,
5792	,, 845	,,	9×4	19	7	,,	,, ,, ,,
5793	T. S. 1049	,,	10½×5	12	10	,,	,, ,, ,,
5794	,, 1058	,,	10¼×4¼	15	9 or 10	,,	,, ,, Incomplete.
5795	P. A. 375 b	,,	4¾×3¼	4	10	,,	,, ,, ,,

5796	S. S.	57	„	$11\frac{1}{8} \times 3\frac{3}{4}$	3	8 or 9	„	„	„	„
5797	B. L.	5058	„	$11\frac{7}{8} \times 6\frac{1}{8}$	3	10	„	„	VI Incomplete.	
5798	J. L.	846	„	$6\frac{1}{2} \times 4\frac{3}{4}$	16	9	„	„	„	Complete.
5799	„	847	„	$11\frac{1}{4} \times 3\frac{3}{4}$	6	9	„	„	VII	Complete.
5800	T. S.	1051	„	$10\frac{1}{4} \times 4\frac{1}{4}$	5	8	„	„	„	„
5801	S. K.	301	„	$11 \times 4\frac{1}{2}$	5	9	„	„	„	„
5802	S. S.	58	„	$12\frac{1}{3} \times 7$	19	23	„	„	II-VI	„
5803	S. K.	303	„	$10\frac{1}{2} \times 3\frac{3}{4}$	13	9	„	„	II, IV&VII	„
5804	„	298 a	„	$11 \times 3\frac{1}{2}$	47	7	„	„	V-VII	„

॥ बालरञ्जनी ॥

5805. BĀLARAÑJANĪ.

Burnell's Catalogue No. 5079. Page 41. Right column. **Substance**—Paper. Size—$10\frac{7}{8} \times 4\frac{1}{2}$ **inches.** Sheets—38. Lines—8 or 9 to a Page. Script—Devanāgarī. No. of Granthas—570. Author—Bālasūri. Incomplete. Not printed.

Beginning:

श्रीः

यज्ञेश्वरबुधेन्द्रस्य गुरोश्चरणपङ्कजम् ।
नत्वा बालकृती चारु तनुते बालरञ्जनीम् ॥

विभक्त्यर्थप्रबोधेन पण्डितो जायते जनः ।
तस्मात्ते प्रतिपाद्यन्ते विभक्त्यर्था इहाधुना ॥
तिङो विभक्तयः प्रोक्ताः सुपश्चापि तथा स्मृताः ।
आदौ तिङर्था उच्यन्ते सुबर्थज्ञानकारणात् ॥

End:

प्रपरा + परि उप । इत्यव्ययानि ।
एवं किल मया सर्वं सङ्ग्रहेणात्र कीर्तितम् ।
विशिष्य बालबोधिन्यामुक्तं सर्वं प्रगृह्यताम् ॥

Colophon:

श्रीमत्तुलजभूपालसूनोः शरभभूपतेः ।
तुष्ट्यर्थं बालकृतिना रचिता बालरञ्जनी ॥

Subject: Bālarañjanī.

Remarks:—The Ms. is in good condition.

